K21U 1472

Reg. No. : ..............................

Name : ..................................

**V Semester B.A. Degree (CBCSS – Sup./Imp.) Examination, November 2021**
**(2015 – '18 Admns.)**
**CORE COURSE IN SANSKRIT**
**5B09SKT : Veda and Arthasastra**

Time : 3 Hours — Max. Marks : 40

*सूचना : सर्वे प्रश्नाः संस्कृत भाषयैव समाधेयाः। देवनागरीलिपिरुपयोक्तव्या।*

I. क) एकेन द्वाभ्यां वा वाक्याभ्यां षण्णामुत्तराणि समाधत्त। (1×6=6)

1) अध्वरमित्यस्य कोऽर्थः ?
2) देवः सविता कथं आयाति ?
3) इन्द्रं हन्तुमागतौ असुरौ कौ ?
4) नवग्वाः इत्यस्य कोऽर्थः ?
5) 'मृगो न भीमः' इत्यस्य क आशयः ?
6) उद्गाता केन वेदेन सम्बद्धः ?
7) 'पिता माता भ्रातर एनमाहुः' किमाहुः ?
8) कितवस्य प्रतिज्ञा का आसीत् ?

ख) एकेन द्वाभ्यां वा वाक्याभ्यां पञ्च समाधत्त । (1×5=5)

9) तस्यायं प्रकरणाधिकरणसमुद्देशः-कस्य ?
10) कौटिल्यमते कतिविद्याः सन्ति ? – के च ते ?
11) वैश्यस्य स्वधर्म किम् ?
12) विद्या कं विनयति ?
13) रसदाः के ?
14) को नाम लुब्धवर्ग ?
15) कीदृशमन्तःपुरं कारयेत् ? –कुत्र ?

P.T.O.



II. एकैकया खण्डिकया त्रयाणामाशयं विशदयत। (3×3=9)

16) अग्निर्होता कविक्रतुस्सत्यश्चित्रश्रवस्तमः।
देवो देवेभिरागमत्।।

17) याति देवः प्रवता यात्युद्वता याति शुभ्राभ्यां यजतो हरिभ्याम्।
आ देवो याति सविता परावतोऽपविश्वा दुरिता बाधमानः।।

18) कुविस्स देवीस्सनयो नवो वा यामो वभूयादुवसो वो अद्य।
येना नवग्वे अङ्गिरे दशग्वे सप्तास्ये रेवती रेवदूष।।

19) यो जात एव प्रथमो मनस्वान्देवो देवान् क्रतुना पर्यभूषत्।
यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य महना स जनास इन्द्रः।

20) अन्ये जायां परिमृशन्त्यस्य यस्यागृधद्वेदने वाज्यक्षः।
पिता माता भ्रातर एनमाहुर्न जानीमो नयता बद्धमेतम्।।

III. क) द्वयोरुत्तरं विस्तरेण प्रतिपाद्यताम्। (2×2=4)

21) वर्णाश्रमाणां स्वधर्माचरणं विशदयत।
22) अरिषड्वर्गत्यागः
23) के के जना गूढपुरुषा भवितुमर्हन्ति ?
24) के के क्रुद्धवर्गः ? विशदयत।

ख) द्वयोरुत्तरं विस्तरेण प्रतिपाद्यताम्। (2×2=4)

25) ग्रन्थोक्तदिशा अक्षाणां स्वभावं विशदयत।
26) अग्निसूक्तानुसारेण अग्नेः स्वरूपं विशदयत।
27) सवितुः गमनमार्गं वर्णयत।
28) उषसः स्वरूपं वर्णयत।

IV. द्वे उपन्यस्यत। (6×2=12)

29) इन्द्रसूक्तानुसारेण इन्द्रस्य स्वभावं वर्णयत।

अथवा

अक्षक्रीडायाः दुष्परिणामं विशदयत।

30) अमात्यनियुक्तिविषये विविधानामाचार्याणां मतानि विशदयत।

अथवा

राज्ञो दिनचर्यां विशदयत।